श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपराशरभट्टार्यैरनुगृहीता

# ॥ श्री अष्टश्लोकी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अष्टश्लोकी ॥

श्रीपराशर भट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥

अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृत्
मकारार्थो जीवस्तदुपकरणम् वैष्णवमिदम्।
उकारोऽनन्यार्हं नियमयति संबन्धमनयोः
त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत्॥ 1॥

मन्त्रब्रह्मणि मध्यमेन नमसा पुंसः स्वरूपं गतिः
गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः।
स्वातन्त्र्यं निजरक्षणं समुचिता वृत्तिश्च नान्योचिता
तस्यैवेति हरेर्विविच्य कथितं स्वस्यापि नार्हं ततः॥ 2॥

अकारार्थायैव स्वमहमथ मह्यं न निवहाः
नराणां नित्यानामयनमिति नारायणपदम्।
यमाहास्मै कालं सकलमपि सर्वत्र सकलासु
अवस्थास्वाविः स्युः मम सहजकैङ्कर्यविधयः॥ 3॥

देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्यात् तृतीयम्
स्वातन्त्र्यान्धो यदि स्यात् प्रथममितरशेषत्वधीश्चेत् द्वितीयम्।
आत्मत्राणोन्मुखश्चेन्नम इति च पदं बान्धवाभासलोलः
शब्दं नारायणाख्यं विषयचपलधीश्चेत् चतुर्थीं प्रपन्नः॥ 4॥

नेतृत्वं नित्ययोगं समुचितगुणजातं तनुख्यापनञ्च
उपायं कर्तव्यभागं त्वथ मिथुनपरं प्राप्यमेवं प्रसिद्धम्।

स्वामित्वं प्रार्थनां च प्रबलतरविरोधिप्रहाणं दशैतान्
मन्तारं त्रायते चेत्यधिगतनिगमः षट्पदोऽयं द्विखण्डः ॥ 5 ॥

ईशानां जगतामधीशदयितां नित्यानपायां श्रियं
संश्रित्याश्रयणोचिताखिलगुणस्याङ्घ्री हरेराश्रये।
इष्टोपायतया श्रिया च सहितायात्मेश्वरायार्थये
कर्तुं दास्यमशेषमप्रतिहतं नित्यं त्वहं निर्ममः ॥ 6 ॥

मत्प्राप्त्यर्थतया मयोक्तमखिलं संत्यज्य धर्मं पुनः
मामेकं मदवाप्तये शरणमित्यार्तोऽवसायं कुरु।
त्वामेवं व्यवसाययुक्तमखिलज्ञानादिपूर्णोह्यहम्
मत्प्राप्तिप्रतिबन्धकैर्विरहितं कुर्यां शुचं मा कृथाः ॥ 7 ॥

निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरे
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः।
एतत् ज्ञानमुपेयुषो मम पुनस्सर्वापराधक्षयं
कर्तासीति दृढोऽस्मि ते तु चरमं वाक्यं स्मरन् सारथेः ॥ 8 ॥

॥ इति श्री अष्टश्लोकी समाप्ता ॥